|| শ্ৰী ৱিষ্ণুস্তুতিঃ ||

শ্ৰীমধ্ৱসংসেৱিতপাদপদ্মং
ৰুদ্ৰাদিদেৱৈঃপৰিসেৱ্যমানম |
ঋষ্যাদিভিৰ্ৱেদপথৈঃ সুগেয়ং
কথং নু পশ্যেয়মমোঘৱীৰ্য়ম || ১ ||

হৃন্মংদিৰে সুংদৰৰত্নপীঠে
লক্ষ্ম্যাত্মকে সাৰতৰে নিৱিষ্টম |
শ্ৰীভূসমাশ্লিষ্টতনুং তথাঽপি
পূৰ্ণং নিজানংদময়ং পৰেশম || ২ ||

অনংতপূৰ্ণেংদুকিৰীটশোভিতং
সুনীলস্নিগ্ধালকশোভিসন্মুখম |
প্ৰত্যগ্ৰকংজায়তলোললোচনং
সুচংপকাকোৰকনাসিকায়ুতম || ৩ ||

প্ৰৱালমধ্যাৰ্পিতকুংদকোৰকং
স্ফুৰৎকপোলদ্যুতিদীপ্তকুংডলম |
কেয়ূৰভূষায়ুতবাহুদংডকং
সুচক্ৰশংখাব্জগদাৱিৰাজিতম || ৪ ||

গ্ৰৈৱেয়ৰত্নাভৰণাদিভূষিতং
সৎকৌস্তুভাৱেষ্টিতকংবুকংধৰম |

সুৰ্ণসূত্ৰাংচিতসুংদৰোৰসং
ৱিচিত্ৰপীতাংবৰধাৰিণং প্ৰভুম ॥ ৫ ॥

কৰিৰাজকৰোপমোৰুযুগ্মং
প্ৰিয়য়া সেৱিতজংঘয়া সমেতম ।
ৱৰকূৰ্মপ্ৰপদেন শোভমানং
হ্যনভিৱ্যক্তসুগুল্ফপাদযুগ্মম ॥ ৬ ॥

নখৰাজিসুপূৰ্ণচংদ্ৰকাংত্যা
নুতিমজ্জনতাপহাৰিণং ৰমেশম ।
নিজপূৰ্ণসুবোধৱিগ্ৰহং
পৰমানংদপৰাত্মদৈৱতম ॥ ৭ ॥

॥ ইতি শ্ৰীৱিষ্ণুস্তুতিঃ ॥